**स्तावक** त्रि॰ स्तु-ण्वुल्। स्तुतिकारके प्रशंसाकारके।

**स्तिमित** न॰ स्तिम-भावे क्त। १आर्द्रतायाम् अमरः। २अचाञ्चल्ये च मेदि॰ कर्त्तरि क्त। ३अचञ्चले ४आर्द्रे च त्रि॰।

**स्तिभि** पु॰ स्तिम-इन् भुक् च। १समुद्रे २वायौ च उणा॰।

**स्तीर्वि** पु॰ स्तॄ-क्विन् न वेरित्त्वम्। १आकाशे २रुधिरे ३तृणजातौ ४अध्वर्य्यौ ५पयसि ६शान्तौ संक्षिप्तसा॰।

**स्तुत** पु॰ स्तु-कर्मणि क्त। स्तुतिकर्मणि अमरः।

**स्तुति** स्त्री स्तु-क्तिन्। स्तवे अमरः। [अमरः

**स्तुतिपाठक** पु॰ स्तुतिं पठति पठ-ण्वुल्। राजादेर्वन्दिनि

**स्तुन्भ** रोधने सौ॰ क्र्या॰ स्वा॰ कार्य्यभागी पर॰ सक॰ सेट् उदित् क्त्वावेट्। स्तुभ्नोति स्तुभ्नाति। अस्तुम्भीत्। सौत्रत्वादषोपदेश इत्यन्ये।

**स्तुतिव्रत** पु॰ स्तुतौ व्रतमस्य। स्तुतिपाठके जटा॰। २६६८पृ॰ दृश्यम्

**स्तुत्यर्थवाद** पु॰ ३त॰। प्रशंसया अर्थवादभेदे अर्थवादशब्दे

**स्तुनक** पुंस्त्री॰ स्तु-नकक्। छागे शब्दच॰ स्त्रियां ङीष्।

**स्तुभ** पुंस्त्री॰ स्तुन्भ-कूलक। छगे भरतः स्त्रियां ङीष्।

**स्तूप** उच्छ्राये अद॰ चु॰ उभ॰ सक॰ सेट्। स्तूपयति ते अतुस्तूपत् त। बह्वच्कत्वात् अषोपदेश एव। ५१७२ पृष्ठे ष्टूप इति धातुः षोपदेशतया प्रमादात् लिखितः।

**स्तूप** पु॰ स्तु-पक् पृषो॰ स्तूप-अच् वा। १राशीकृते मृत्तिकादौ २संघाते ३बले ४निष्प्रयोजने च संक्षिप्त॰।

**स्तृ** विस्तारे स्वा॰ उ॰ सक॰ अनिट्। स्तृणोति स्तृणुते अस्तार्षीत् अस्तृत अस्तरिष्ट। पर्युदासान्न षोपदेशः।

**स्तृ** प्रीतौ अक॰ रक्षणे सक॰ स्वा॰ प॰ अनिट्। स्तृणोति अस्तार्षीत्। पर्युदासेन अषोपदेश एव।

**स्तॄ** आच्छादने क्र्या॰ प्वा॰ उ॰ सक॰ सेट्। स्तृणाति स्तृणीते अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट। अयं षोपदेश एव न्याय्यः।

**स्तेन** चौर्य्ये अद॰ चु॰ उभ॰ सक॰ सेट्। स्तेनयति-ते अतिस्तेनत्-त। बह्वच्कत्वात् अषोपदेशः।

**स्तेन** न॰ स्तेन-भावे अच्। १चौर्य्ये। कर्त्तरि अच्। २चौरे त्रि॰ अमरः।

**स्ते(ष्टे)प** क्षेपे चु॰ उभ॰ सक॰ सेट्। स्तेपयति-ते अतिस्तिपत्-त। अषोपदेशत्वे मूलं चिन्त्यम्।

**स्तेम** पु॰ स्तिम-घञ् १आर्द्रीभावे २स्नेहे च अमरः।

**स्तेय** न॰ स्तेनस्य भावः यत् नलोपः। १चौर्य्ये अमरः। "प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा। यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितम्" इत्युक्तेः परद्रव्यापहारः स्तेयं तच्च अष्टादशविवादान्तर्गतविवादपदभेदः तत्स्वरूपादिकं वीरमि॰ उक्तं चौरशब्दे २९६९ पृष्ठादौ दृश्यम्। [ङीप्।

**स्तेयिन्** त्रि॰ स्तेयमस्त्यस्य इनि। परद्रव्यापहारके स्त्रियां

**स्तैन(न्य)** न॰ स्तेनस्य भावः अण्, ष्यञ् वा। १चौर्य्ये परद्रव्यापहरणे। स्तेन एव स्वार्थे ष्यञ्। २चौरे त्रि॰भरतः।

**स्तैमित्य** न॰ स्तिमितस्य भावः ष्यञ्। १जाड्ये २स्नेहे ३आर्द्रीभावे च। [२जलविन्दौ ३अल्पे त्रि॰ अमरः।

**स्तोक** पुंस्त्री॰ स्तुच-घञ्। १चातके मेदि॰ स्त्रियां ङीष्।

**स्तोकक** पुंस्त्री॰ स्तोकाय जलविन्दवे कायति शब्दायते कै-क। चातके अमरः स्त्रियां ङीष्।

**स्तोत्र** न॰ स्तु-ष्ट्रन्। १स्तवे-गुणकर्मादिभिः प्रशंसने अमरः। "द्रव्यस्तोत्रं कर्मस्तोत्रं विधिस्तोत्रं तथैव च। तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुर्विधम्" मत्स्यपु॰ १२२ अ॰ द्रव्याद्युपाधिकतया स्तवस्य चातुर्विध्यमुक्तम्। २स्तुतिसाधने वाक्ये स्तुतिस्तु गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनरूपा ऋग्वेदभाष्ये लक्षिता। यथा यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति यद्यपि ष्टुञ्स्तुतौ शन्सु स्तुतावित्येकार्थौ तथापि प्रगीतमन्त्रसाध्यं स्तोत्रम् अप्रगीतमन्त्रसाध्यं शस्त्रमिति तयोर्विवेक इति च तत्रोक्तं प्रगीतमन्त्रसाध्ये ३स्तवने गुणकथने च। शस्त्रशब्दे प्रगीतमन्त्रे इति यदुक्तं तत्र अप्रगीतमन्त्रे इत्येव बोध्यम्। प्रगीतऋग्जातं शस्त्रमिति छा॰ उ॰ भाष्य॰ टीकायामानन्दगिरिणोक्तं ४प्रगीते ऋग्जाते च।

**स्तोत्रिय** त्रि॰ स्तोत्राय हितं घ। स्तोत्रसाधने ऋगादौ "कत्ययमद्यास्मिन् यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्रः इति पुरोऽनुवाक्या च याज्या शस्यैव च तृतीया इति" छा॰उ॰। "स्तोत्रिया नाम ऋक्सामसमुदायः" भा॰भा॰। "स्तोत्रिया नाम गीतिविशिष्टा ऋग्जातयः" शत॰ब्रा॰१४।६।१।१२ वाक्यव्याख्यायां सायनभाष्यम्। "यथोक्तस्य स्तोत्रं स्तोत्रियां वर्चं साम वा यजुर्वाऽथर्वोन्यत् कृत्वा यजेत" कात्या॰श्रौ॰ २४।७ २॰ "एकां स्तोत्रियामेकां ऋचामन्यां कुर्य्यात्" कर्कः।

**स्तोभ** पु॰ स्तुभ-घञ्। १अर्थशून्ये गानादिस्वरपरिपूरणार्थे शब्दभेदे यथा सामवेदे हउ हाइ प्रस्तावः। २हेलने ३स्तम्भने च हेमच॰।